**BOARD OF INTERMEDIATE EDUCATION : HYDERABAD**

**SECOND LANGUAGE - SANSKRIT -II**

**मानकप्रश्नपत्रम् - संस्कृतम्**

**Model Paper (w.e.f IPE March 2015)**

**Time: 3 Hrs.** **Marks : 100**

---

सूचना - प्रथमा - द्वितीया - तृतीयप्रश्नान् विहाय सर्वेऽपि प्रश्नाः संस्कृते एव समाधेयाः।

**I. एकस्य श्लोकस्य प्रतिपदार्थं भावं लिखत।** 1 X 8 = 8 M

अ. कुर्वीत सङ्गतिं सद्भिर्नासद्भिर्गुणवर्जितैः।
प्राप राघवसङ्गत्या प्राज्यं राज्यं विभीषणः।।

आ. अप्रमत्ताश्च सत्यैकपराः भवत सर्वदा।
विजयः सत्यनिष्ठानां तथ्यं नास्त्यत्र संशयः।।

**II.एकं निबन्धप्रश्नं समाधत्त।** 1 X 6 = 6 M

अ. गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत ?

आ. हरिश्चन्द्रः सत्यमेव जयते इति कथं निरूपितवान्?

**III.एकं निबन्धप्रश्नं समाधत्त।** 1 X 6 = 6 M

अ. शुकशाबकाः हारीतेन कथं रक्षितः?

आ. चूडाला शिखिध्वजस्य मनः कथं परिवर्तितवती?

**IV.त्रयाणां प्रश्नानां समाधानं लिखत।** 3 X 2 = 6 M

अ. आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः?

आ. राज्यं नाम कीदृशम्?

इ. वासुकिना गरुत्मान् किमिति अभिहितः ?

ई. जीमूतवाहनं प्रत्युज्जीवयन्ती देवी गौरी किमिति अवोचत् ?

उ. पार्वती तपः कथम् आचरति ?

ऊ. चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते।

**V.द्वयोः ससन्दर्भं व्याख्यानं लिखत।** 2 X 3 = 6 M

अ. मनोरथो महानेषः भगीरथ! महारथ !

आ. ध्रुवमूष्मणि दारुणो - दवाग्निः।

इ. ब्रह्मर्षिणा तेन जितोऽस्मि सत्यम्।

ई. नृणां हि नीतिः क्व नु।

**VI.द्वयोः ससन्दर्भं व्याख्यानं लिखत।** 2 X 3 = 6 M

अ. अहो प्रभावः तपसाम्।

आ. भवन्तमभिषेक्तुम् आगतं मया।

इ. मनः एव मनुष्याणां कारणं बन्धमोक्षयोः।

ई. कमपि प्रतिकारं कुरुष्व।

**VII.त्रयाणां प्रश्नानां समाधानं लिखत।** **3X 2= 6M**

अ. हर: गङ्गां किं प्रति विससर्ज ?
आ. पाण्ड्यराज: खड्गं कथं प्राप्तवान् ?
इ. जन्मावधि किं न कुर्यात् ?
ई. कानि यत्नत: गोप्यानि ?
उ. नृप: किमिति निश्चयमागत: ?
ऊ. विश्वसृट् कुत: पूजां न स्वीकुर्यात् ?

**VIII.** त्रयाणां प्रश्नानां समाधानं लिखत। **3X 2= 6M**

अ. बाणभट्टेन विरचितं काव्यद्वयं किम् ?
आ. मेधानां गणस्य नाम किम् ?
इ. अन्ते वीर: राजानं किम् अवोचत् ?
ई. कदा नरेन्द्रस्य विस्मय: द्विगुण: अजायत ?
उ. चूडाला स्वपतिदेवं किमिति अवदत् ?
ऊ. क: स्वर्गराज्यम् आक्राम्यत् ?

**IX.एकेन वाक्येन समाधानं दत्त।** **5X 1= 5M**

अ. सर्वलोकपितामह: क: ?
आ. मधुराराज: कीदृश: ?
इ. शिशुपालस्य शिर: केन छिन्नम् ?
ई. शूरं केन भेदयेत् ?
उ. हरिश्चन्द्रस्य केन विस्मृति: आगता ?

**X.एकेन वाक्येन समाधानं दत्त।** **5X 1= 5M**

अ. शुकस्य नाम किम् ?
आ. कृष्णचरितं केन विरचितम् ?
इ. केन कर: प्रेषित: ?
ई. सिद्धपुरुष: क: ?
उ. उज्जयिन्या: राजा क: ?

**XI.अधो निर्दिष्ट कथां पठित्वा प्रश्नानां समाधानानि दत्त।** **5X 1= 5M**

अङ्गदेशे लोमपादो नाम राजा बभूव। तस्य जनपदे कदाचित् महती अनावृष्टि: सञ्जाता। तेन बहूनां प्रणिनाम् उच्छेद: समभवत्। अथ स: राजा वेदपारगै: विप्रै: वरुणम् आराधयामास। अथापि वृष्टि: नास्ति।

अनन्तरं चिन्ताकुल: भूपाल: भूसुरान् आहूय पप्रच्छ। - केन उपायेन वृष्टि: स्यात् ? इति।

ते च एवं प्रोचु: -

"महाराज: अस्ति विभण्डको नाम महर्षि: वनस्थ:। तस्य च ऋष्यशृङ्ग: नाम तनय: । स: महात्मा यथाजात: अनाघ्रातविषयगन्ध: न जानपदान् वृत्तान्तान् जानाति। पितेव ब्रह्मनिष्ठ: पितृशुश्रूषापरश्च। स: यद्यानीयते जनपदं तदवस्थं वृष्टि: भविष्यति। परन्तु पितु: सकाशात् तदानयनं दुष्करं मन्यामहे "इति।

**प्रश्नः -**

१. लोमपादस्य जनपदे कदाचित् का सञ्जाता ?

२. राजा वेदपारगैः कम् आराधयामास ?

३.भूपालः भूसुरान् आहूय किमिति प्रपच्छ ?

४. वनस्थः महर्षिः कः ?

५. ऋष्यशृङ्गः कान् न जानाति ?

**XII.नामनिर्देशपूर्वकं त्रीणि सन्धत्त ।** **3 X 2 = 6 M**

अ. मनस् + चलति ।

आ. रामस् + षष्ठः ।

इ. वाक् + वादः।

ई. सुप् + अन्तम् ।

उ. नमः + ते

ऊ. बालः + खादति ।

**XIII.नामनिर्देशपूर्वकं त्रीन् विघटयत।** **3 X 2 = 6 M**

अ. शरच्चन्द्रः

आ. सज्जनः

इ. वाङ्महिमा

ई. तपोवनम्

उ. गुरुर्जयति

ऊ. प्रथमोऽध्यायः

**XIV.द्वयोः शब्दयोः सर्वविभक्तिरूपाणि लिखत।** **2 X 6 = 12 M**

अ. जलमुक्  आ. वाक्  इ.मनस्  ई. यद् स्त्रीलिङ्गे

**XV. समासनामनिर्देशपूर्वक त्रयाणां विग्रहवाक्यानि लिखत ।** **3 X 2 = 6 M**

अ. यथाशक्ति ।

आ. अधर्मः।

इ. त्रिभुवनम्।

ई. महाबलः ।

उ. रामलक्ष्मणौ ।

ऊ. कार्यकुशलः ।

**XVI. वाक्यशुद्धीकरणम् कुरुत।** **5 X 1 = 5 M**

१. छात्रः गुरुं नमस्कुर्वन्ति।

२. उपाध्यायः पाठान् पाठयन्ति।

३. ग्रनाथालये पुस्तकं सन्ति।

४. युवकः क्रीडाङ्गणे क्रीडन्ति।

५. वानराः वृक्षमूले अतिष्ठत्।

***